

# शिव षडक्षरी स्तोत्रम्-॥ॐ ॐ॥

https://www.chalisa.online

|| शिव षडक्षरी स्तोत्रम् ||

॥ॐ ॐ॥

ॐकारबिंदु संयुक्तं नित्यं ध्यायंति योगिनः ।
कामदं मोक्षदं तस्मादोंकाराय नमोनमः ॥ 1 ॥

॥ॐ नं॥

नमंति मुनयः सर्वे नमंत्यप्सरसां गणाः ।
नराणामादिदेवाय नकाराय नमोनमः ॥ 2 ॥

॥ॐ मं॥

महातत्वं महादेव प्रियं ज्ञानप्रदं परं ।
महापापहरं तस्मान्मकाराय नमोनमः ॥ 3 ॥

॥ॐ शिं॥

शिवं शांतं शिवाकारं शिवानुग्रहकारणं ।
महापापहरं तस्माच्छिकाराय नमोनमः ॥ 4 ॥

॥ॐ वां॥

वाहनं वृषभोयस्य वासुकिः कंठभूषणं ।
वामे शक्तिधरं देवं वकाराय नमोनमः ॥ 5 ॥

॥ॐ यं॥

यकारे संस्थितो देवो यकारं परमं शुभं ।
यं नित्यं परमानंदं यकाराय नमोनमः ॥ 6 ॥

षडक्षरमिदं स्तोत्रं यः पठेच्छिव सन्निधौ ।
तस्य मृत्युभयं नास्ति ह्यपमृत्युभयं कुतः ॥

शिवशिवेति शिवेति शिवेति वा
भवभवेति भवेति भवेति वा ।
हरहरेति हरेति हरेति वा
भुजमनश्शिवमेव निरंतरम् ॥

इति श्रीमत्परमहंस परिव्राजकाचार्य
श्रीमच्छंकरभगवत्पादपूज्यकृत शिवषडक्षरीस्तोत्रं संपूर्णम् ।

|| https://www.chalisa.online ||